स्यात्काञ्जिकन्तु २२सौवीर २३मारनालं २४तु दोषकृत् । काञ्जिकं शिशिरस्पर्शं पाचनं रोचनं लघु । तुषोदकं यवैः रामं सतुषैः सकलैः कृतम् । सौवीरकं कृतन्त्वामैः पक्वैर्वा निस्तुषैर्यवैः । सर्वैरेसैरसाम्लं २५स्यात् सौवीरकमिति कचित् । तुषाम्बु दीपनं हृद्यं पाण्डु कृमिगदापहम् । सौवीरकं ग्रहण्यर्शोनाशनं भेदि दीपनम् । धान्याम्ल२५ न्धान्ययोनित्वात्प्रीणनं लघु दीपनम् । स्पर्शदाहकरं पानात्पाचनं श्लेष्मनाशनम् । गण्डूषान्मुखवैरस्यदौर्गन्ध्यकफकृन्तनम्"। ऐक्षवस्य द्वैविध्यमाह भावप्र० "इक्षोः पक्वैः रसैः सिद्धः सीधुः पक्वरसश्च सः । आमैस्तैरेव यः सीधुः स च शीतरसः स्मृतः" इति । इक्षुः काशमूलं तस्येदम् अण् । २काशमूलावयवभूते स्त्रियां ङीप् । इक्षुः इक्षुपत्राकारः अस्त्यस्य अण् । ४इक्षुपत्राकारे च स्त्रियां ङीप् । "ऐक्षव्यौ विधृती" कात्या० ८,१,१४, "विधृती ऐक्षव्यौ काशमूलावयवभूते अत्र भवतः "काशमयः प्रस्तरः काशमूलमये विधृती" शाखान्तरीयवाक्यशेषात्" कर्कः । अधिकरणमालायां "बर्हिःप्रस्तरयोरन्तराले तिर्य्यक्प्रसार्य्यमाणौ दर्भौ विधृती ते अत्र इक्षुपत्ररूपे स्याताम् इति" माधवः । तेनात्र ऐक्षव्यशब्दकल्पनं प्रामादिकम् । "द्रोणकलशं वायव्यानिध्मकार्ष्मर्य्यमयान् परिधीनाश्ववालं प्रस्तरमैक्षव्यौ विधृती तद्बर्हिरुपसंनद्धं भवति" शत०ब्रा० ३,६,३,१०,

ऐक्षुक त्रि० इक्षौ साधु गुडा० ठञ् । इक्षुसाधुनि क्षेत्रादौ इक्षुं भारभूतं वहति आवहति वा ठञ् । १भारभूतेक्षुवाहके २तदावाहके च । इक्षवःसन्त्यस्यां नडादि० छ कुक् च । इक्षुकीया भूमिस्तस्यां भवः अण् विल्वकादि० छमात्रस्य लुक् । ऐक्षुक । तादृशभूमिभवे त्रि० ।

ऐक्षुभारिक त्रि० इक्षुभारं वहत्यावहति वा ठञ् । इक्षु १वाहके २तदावाहके च ।

ऐक्ष्वाक पु० इक्ष्वाकोर्गोत्रापत्यम् अण् नि० । १सूर्य्यवंश्ये नृपे बहुषु अणोलुक् । "इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः" रघुः । इक्ष्वाकोरयं जनपदः । ऐक्ष्वाक २तद्राजके जनपदे च बहुषु लुक् । तत्र भवः कोपधत्वात् अण् ऐक्ष्वाक तज्जनपदभवे बहुषु लुक् । क्वचिन्न लुक् । "ऐक्ष्वाकेषु च मैथिलेषु च फलन्त्यस्य कमद्याशिषः" इति मुरारिः । "ऐक्ष्वाकं पुरुषव्याघ्रमतिमानुषविक्रमम्" भा० शा० २९अ० । "त्रिशङ्कुर्बन्धुभिर्मुक्त ऐक्ष्वाकः प्रीतिपूर्व्वकम् भा० अनु० ३अ० । अत्र ऐक्ष्वाकुरितिपाठस्तु आर्षत्वात् साधुः [इङ्गुदीवृक्षफले (जिआयुती)

ऐङ्गुद न० इङ्गुद्याः फलम् फले अण् तस्य प्लक्षा० न लुक् ।

ऐच्छिक त्रि० इच्छया निर्वृत्तः ठञ् । इच्छया कृते स्त्रियां ङीप्

ऐड पु० इडाशब्दोऽस्त्यत्रानुवाकेऽध्याये वा विमुक्ता० अण् । इडाशब्दयुक्ते १अध्याये २अनुवाके च एडस्येदम् अण् । ३मेषसम्बन्धिनि त्रि० स्त्रियां ङीप् । इडा+अपत्ये शिवा० अण् । इडापत्ये पुरूरवसि पु० ।

ऐडक पुंस्त्री एडक एव स्वार्थेऽण् । १मेषाकारे दक्षिणापथप्रसिद्धे पशुभेदे "त्रयो वा पशवोऽमेध्यादुर्वराह ऐडकः श्वा च" शत०ब्रा० १२,४,६,४ । एडकस्येदम् अण् तत्संबन्धिनि त्रि० एडकशब्दे उदा० ।

ऐड(ल)विड(ल) पु० इड(ल) विडा(ला) या अपत्यम् "ऋष्यन्धकवृष्णिकुरुभ्यश्च" ... "अष्टाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः" पा० ढकोऽपवादः अण् डलयोरेकत्वस्मरणात् उभयत्र अन्यतरतो वा डस्य लो वा । कुवेरे । "तस्य प्रीतेन मनसा तान् दत्त्वैडविडस्ततः" भाग० ४,१२,८ ।

ऐडिविड पु० सूर्य्यवंश्ये क्षत्रियभेदे "नारीकवच इत्युक्तो निःक्षत्रे मूलकोऽभवत् । ततोदशरथः पुत्रस्तस्मादिडिविडस्ततः" भाग० ९,९,२२ । सूर्य्यवंशवर्णने ।

ऐण त्रि० एणस्य कृष्णमृगस्येदम् अण् । कृष्णमृगचर्म्मादौ । एणशब्दे उदा० । [एणीपचनदेशभवे ।

ऐणीपचन त्रि० एणीपचनदेशे भवः छाभावपक्षे अण् ।

ऐणेय त्रि० एण्या इदम् ढक् । १कृष्णमृगचर्म्मादौ "ऐणेयरौरवाजानि अजिनानि" गोभि० । २रतिबन्धभेदे हेम० ।

ऐतर त्रि० इतरस्यादूरभवादौ सङ्कलादि० चतुरर्थ्याम् अण् । इतरादूरभवदेशतत्सन्निकृष्टदेशादौ ।

ऐतरेय न० इतरस्य तन्नाम्न ऋषेरपत्यम् शुभ्रा० ढक् । १इतरर्षेरपत्ये । "महिदासः ऐतरेयः ऋषि तेन प्रोक्तम् उ० अण् । २आरण्यकादि व्रताख्यापके ऋग्वेदीयब्राह्मणभेदे "ऐतरेयञ्च छान्दोग्यं वृहदारण्यकं दश" इत्युक्ते तदीये ३उपनिषद्भेदे ४वेदशाखाभेदे च तदधीयते इति । ऐतरेयिन् तदध्येतृषु "अन्तरेण हविषी विष्णुमुपांश्वैतरेयिणः" आश्व०श्रौ०१,३,१२ "अग्नीषोमावेवमित्यैतरेयिणः ३,६,३ । एकाहांश्चैतरेयिणः"१०,१,१२ ।

ऐतिकायन पुंस्त्री इतिकस्यर्षेर्गोत्रापत्यं नडादि० फक् । इतिकर्षेर्गोत्रापत्ये । अनन्तरापत्ये तु इञ् । ऐतिकिरिति

ऐतिशायन पुंस्त्री ऐतिकवत् । इतिशर्षेर्गोत्रापत्ये ।

ऐतिहासिक त्रि० इतिहासादागतः इतिहासं वेत्त्यधीते वा